श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ दशमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ दशमः सर्गः ॥

## कैकेय्याः सद्मनि समागतस्य दशरथस्य तां कोपभवनगतामवलोक्य दुःखं तेन तस्यै सान्त्वनाप्रदानं च

विदर्शिता यदा देवी कुब्जया पापया भृशम्।
तदा शेते स्म सा भूमौ दिग्धविद्धेव किन्नरी ॥ **2.10.1** ॥

निश्चित्य मनसा कृत्यं सा सम्यगिति भामिनी।
मन्थरायै शनैः सर्वमाचचक्षे विचक्षणा ॥ **2.10.2** ॥

सा दीना निश्चयं कृत्वा मन्थरावाक्यमोहिता।
नागकन्येव निःश्वस्य दीर्घमुष्णं च भामिनी ॥ **2.10.3** ॥

मुहूर्तं चिन्तयामास मार्गमात्मसुखावहम्।
सा सुहृच्चार्थकामा च तं निशम्य विनिश्चयम् ॥ **2.10.4** ॥

बभूव परमप्रीता सिद्धिं प्राप्येव मन्थरा।
अथ सा रुषिता देवी सम्यक्कृत्वा विनिश्चयम् ॥ **2.10.5** ॥

संविवेशाबला भूमौ निवेश्य भ्रुकुटिं मुखे।
ततश्चित्राणि माल्यानि दिव्यान्याभरणानि च ॥ **2.10.6** ॥

अपविद्धानि कैकेय्या तानि भूमिं प्रपेदिरे।
तया तान्यपविद्धानि माल्यान्याभरणानि च ॥ **2.10.7** ॥

अशोभयन्त वसुधां नक्षत्राणि यथा नभः।
क्रोधागारे च पतिता सा बभौ मलिनाम्बरा ॥ **2.10.8** ॥

एकवेणीं दृढां बद्ध्वा गतसत्त्वेव किन्नरी।
आज्ञाप्य तु महाराजो राघवस्याभिषेचनम् ॥ **2.10.9** ॥

उपस्थानमनुज्ञाप्य प्रविवेश निवेशनम्।
अद्य रामाभिषेको वै प्रसिद्ध इति जज्ञिवान् ॥ **2.10.10** ॥

प्रियार्हो प्रियमाख्यातुं विवेशान्तःपुरं वशी।
स कैकेय्या गृहं श्रेष्ठं प्रविवेश महायशाः ॥ **2.10.11** ॥

पाण्डुराभ्रमिवाकाशं राहुयुक्तं निशाकरः।
शुकबर्हिसमायुक्तं क्रौञ्चहंसरुतायुतम् ॥ **2.10.12** ॥

वादित्ररवसङ्घुष्टं कुब्जावामनिकायुतम्।
लतागृहैश्चित्रगृहैश्चम्पकाशोकशोभितैः ॥ **2.10.13** ॥

दान्तराजतसौवर्णवेदिकाभिः समायुतम्।
नित्यपुष्पफलैर्वृक्षैर्वापीभिरुपशोभितम् ॥ **2.10.14** ॥

दान्तराजतसौवर्णैः संवृतं परमासनैः।
विविधैरन्नपानैश्च भक्ष्यैश्च विविधैरपि ॥ **2.10.15** ॥

उपपन्नं महार्हैश्च भूषणैस्त्रिदिवोपमम्।
स प्रविश्य महाराजः स्वमन्तःपुरमृद्धिमत् ॥ **2.10.16** ॥

न ददर्श स्त्रियं राजा कैकेयीं शयनोत्तमे।
स कामबलसंयुक्तो रत्यर्थी मनुजाधिपः ॥ **2.10.17** ॥

अपश्यन् दयितां भार्यां पप्रच्छ विषसाद च।
नहि तस्य पुरा देवी तां वेलामत्यवर्तत ॥ **2.10.18** ॥

न च राजा गृहं शून्यं प्रविवेश कदाचन।
ततो गृहगतो राजा कैकेयीं पर्यपृच्छत॥ **2.10.19** ॥

यथापुरमविज्ञाय स्वार्थलिप्सुमपण्डिताम्।
प्रतिहारी त्वथोवाच सन्त्रस्ता तु कृताञ्जलिः॥ **2.10.20** ॥

देव देवी भृशं क्रुद्धा क्रोधागारमभिद्रुता।
प्रतीहार्या वचः श्रुत्वा राजा परमदुर्मनाः॥ **2.10.21** ॥

विषसाद पुनर्भूयो लुलितव्याकुलेन्द्रियः।
तत्र तां पतितां भूमौ शयानामतथोचिताम्॥ **2.10.22** ॥

प्रतप्त इव दुःखेन सोऽपश्यज्जगतीपतिः।
सवृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीम्॥ **2.10.23** ॥

अपापः पापसङ्कल्पां ददर्श धरणीतले।
लतामिव विनिष्कृत्तां पतितां देवतामिव॥ **2.10.24** ॥

किन्नरीमिव निर्धूतां च्युतामप्सरसं यथा।
मायामिव परिभ्रष्टां हरिणीमिव संयताम्॥ **2.10.25** ॥

करेणुमिव दिग्धेन विद्धां मृगयुना वने।
महागज इवारण्ये स्नेहात् परमदुःखिताम्॥ **2.10.26** ॥

परिमृज्य च पाणिभ्यामभिसन्त्रस्तचेतनः।
कामी कमलपत्राक्षीमुवाच वनितामिदम्॥ **2.10.27** ॥

न तेऽहमभिजानामि क्रोधमात्मनि संश्रितम्।
देवि केनाभियुक्तासि केन वासि विमानिता॥ **2.10.28** ॥

यदिदं मम दुःखाय शेषे कल्याणि पांसुषु।
भूमौ शेषे किमर्थं त्वं मयि कल्याणचेतसि॥ **2.10.29** ॥

भूतोपहतचित्तेव मम चित्तप्रमाथिनि।
सन्ति मे कुशला वैद्यास्त्वभितुष्टाश्च सर्वशः॥ **2.10.30** ॥

सुखितां त्वां करिष्यन्ति व्याधिमाचक्ष्व भामिनि।
कस्य वापि प्रियं कार्यं केन वा विप्रियं कृतम्॥ **2.10.31** ॥

कः प्रियं लभतामद्य को वा सुमहदप्रियम्।
मा रौत्सीर्मा च कार्षीस्त्वं देवि सम्परिशोषणम्॥ **2.10.32** ॥

अवध्यो वध्यतां को वा वध्यः को वा विमुच्यताम्।
दरिद्रः को भवेदाढ्यो द्रव्यवान् वाप्यकिञ्चनः॥ **2.10.33** ॥

अहं च हि मदीयाश्च सर्वे तव वशानुगाः।
न ते कञ्चिदभिप्रायं व्याहन्तुमहमुत्सहे॥ **2.10.34** ॥

आत्मनो जीवितेनापि ब्रूहि यन्मनसि स्थितम्।
बलमात्मनि जानन्ती न मां शङ्कितुमर्हसि॥ **2.10.35** ॥

करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे।
यावदावर्तते चक्रं तावती मे वसुन्धरा॥ **2.10.36** ॥

द्राविडाः सिन्धुसौवीराः सौराष्ट्रा दक्षिणापथाः।
वङ्गाङ्गमगधा मत्स्याः समृद्धाः काशिकोसलाः॥ **2.10.37** ॥

तत्र जातं बहु द्रव्यं धनधान्यमजाविकम्।
ततो वृणीष्व कैकेयि यद् यत् त्वं मनसेच्छसि॥ **2.10.38** ॥

किमायासेन ते भीरु उत्तिष्ठोत्तिष्ठ शोभने।
तत्त्वं मे ब्रूहि कैकेयि यतस्ते भयमागतम्।
तत् ते व्यपनयिष्यामि नीहारमिव रश्मिवान्॥ **2.10.39** ॥

तथोक्ता सा समाश्वस्ता वक्तुकामा तदप्रियम्।
परिपीडयितुं भूयो भर्तारमुपचक्रमे ॥ **2.10.40** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे दशमः सर्गः ॥